CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेधा

[प्रथमे वर्षे प्रथमोऽङ्कः।]

सम्पादकः प्रकाशकश्च
भोलानाथः पौडेलः
ठूलाघरग्रामनिवासी

सहायकः
रुक्मनाथः पौडेलः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०३९ वैक्रमाब्दः ज्येष्ठः।

मूल्यम् – अष्टौ रूप्यकाणि।

मुद्रकः
लुषस्तुद्रणालयः
वानेश्वरे, काष्ठमण्डपे, नेपाले।

20400

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राज्ञः पृथ्वीनारायणस्योपदेशः

(तस्य सव्याख्यायाः पद्यमय्या व्याख्यायाः कश्चनांशः)

—नयराजः पन्तः

प्रस्तावना

अहमिदानीमेकषष्टिवर्षोऽस्मि । द्वाविंशतिवर्षेण मया नेपालस्येतिहासस्य पठनं प्रारभ्यत । प्राचीनकालस्येतिहासोऽस्मद्देशे क्रमेण लिखितो नोपलभ्यते । तदानीन्तनानां जनानां वचनान्यपि क्रमपूर्वकं नोपलभ्यन्ते । अतस्तेषां विषये निश्चितरूपेण कथनमिदानीं दुःशकमिवाऽस्ते ।

अर्वाचीने नेपालस्येतिहासे राज्ञः पृथ्वीनारायणस्य समुपलभ्यमान उपदेशस्तदीयां राजनीतिज्ञतां द्योतयति । मम विचार आचार्यस्य कौटल्यस्य महनीयेन ग्रन्थेनार्थशास्त्रेणाऽयमुपदेशः कतिभिश्चनांशैः सङ्गच्छत इति प्रतिभाति । अतोऽहमाचार्यकौटल्यमिव राजानं पृथ्वीनारायणमपि महापुरुषं मन्ये । अमरवाण्यां तदीयो भावः सुरक्षितो भवत्विति बुद्धचा मया स उपदेशश्चतुस्त्रिंशेन शतेन (१३४) पद्यैः संस्कृतभाषायामनूद्यते स्म । योगिनो नरहरिनाथस्य प्रयत्नेन प्रकाशितस्य संस्कृतसन्देशनामकस्य मासिकपत्रस्य २०१०–११ वैक्रमाब्दयोः प्रकाशितेषु द्वादशसु खण्डेष्वेकादशखण्डवर्जं प्रतिखण्डं क्रमेण संपूर्णः सोऽनुवादः प्रकाशमलभत । तदानीं मम कृतौ प्रतिलिपिकरणादिभिरायुष्मान् नेपालोपनामको ज्ञानमणिः सख्यमकरोत् ।

जगदम्बाप्रकाशनस्य प्रवन्धकस्य दीक्षितोपनामकस्य कमलमणेः प्रवन्धेन तस्यैवोपदेशस्य नेपालीनाम्ना प्रसिद्धायां भाषायां मया कृतो द्वासप्तत्यधिकशतत्रय (३७२) पद्यात्मकोऽनुवादोऽपि २०२५ वैक्रमाब्दे प्रकाशितोऽभवत् । तस्याऽङ्गतया पृथ्वीनारायणसम्बद्धा अन्येऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः सहैव प्रकाशिता अभवन् । तस्य ग्रन्थस्याऽद्य यावत् पञ्चदश शतानि (१५००) पृष्ठानि प्रकाशितानि । अस्मिन् महति सम्पादन आयुष्मद्भिर्भण्डार्युपनामकदेवीप्रसाद–वज्राचार्योपनामकधनवज्र–वज्राचार्योपनामकगौतमवज्र – पन्तोपनामकदिनेशराजैः प्रशंसनीयं कार्यमक्रियत ।

अहं प्रतिदिनं पाणिनेरष्टकं पठामि । तस्य ग्रन्थस्य सहायकतया संभावितावमरकोशभट्टिकाव्यनामकौ ग्रन्थौ चाऽहं प्रतिदिनं पठामि । यथाशक्ति कौटलीयमर्थशास्त्रं च पठामि । समुपलब्धेऽवसरे संस्कृतभाषानिबद्धानि प्राचीनानि नवीनानि च काव्यानि पठामि । प्रतिदिनं किञ्चिल्लिखामि च । प्रातःकाले प्रबोधे जायमाने प्राय एकं पद्यं रचयामि । एवं प्रचलति दैनिके वर्तने प्रकाशितचरस्य तस्योपदेशस्य पद्यात्मकस्य संस्कृतानुवादस्य प्रतिभातं संशोधनं विधाय पुनः प्रकाशनं शोभनं भवेदिति जायमाने स्वकीये विचारे केषाञ्चन सहृदयानां चोदनायां प्राप्तायां चाऽहं तथाकर्तुं प्रायते । इदानीं संशोधनपूर्वकः संस्कृतपद्यानुवादः समाप्ति गच्छन्निव वर्तते । अधुनापर्यन्तं सार्धशतत्रय (३५०) परिमिताः श्लोका रचिताः । आशंसे कतिपयैर्मासैरयं ग्रन्थः समाप्तो भवेदिति । इदानीमस्मिन् सम्पादनकर्मण्यायुष्मन्तौ पन्तोपनामकौ महेशराजदिनेशराजौ सहायतां कुरुतः । अस्मिन् कर्मणि ये सहायतामकुर्वन्, ये कुर्वन्ति, ये करिष्यन्ति च तान् सर्वानपि शुद्धेन मनसाऽभिनन्दामि ।

२०३१ वैक्रमाब्दे सौरस्य मार्गस्य
षोडशे दिवसे रविवासरे

नयराजः पन्तः
संशोधन–मण्डलम्
नेपालराजधानी काष्ठमण्डपः
१०/३७४ वटुः सवलबहालः

उपक्रमः

मूलपाठः

स्वस्ति श्रीगणेशाय नमः ।। ।। श्रीकालिका सहाः ।। ।। श्री ३ सिव गोरषनाथ सहाः ।। ।। श्री ५ प्रिथिनारायण सहाः ।। ।। श्रीश्रीश्री ५ बुढा महाराजाले तिन सहर नेपाल र हिंडुपतिको राज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लियापछि पछिल्ला पटक् नुहाकोटमा पाउलाग्नुभयामा गुरू प्रोहित थर-घर भैयाद भारादार र आफ्ना ददा सुरथिसिं राना सबैका बुढापाका-छेउ हुकुम भयाका कुरा

संस्कृतभाषायामनुवादः

स्वस्ति। श्रीगणेशाय नमः । श्रीकालिका सहायिका भवतु । श्रीशिवगोरखनाथौ सहायकौ भवताम् । अथ दिवङ्गतस्य महाराजाधिराजस्य पृथ्वीनारायणशाहस्य विषयः प्रस्तूयते । स महाराजाधिराजो नेपालद्रोणिभाञ्जि त्रीणि राज्यानि हिन्दुपतिपदभूषितानां सेनानां च त्रीणि राज्यानि विजित्य स्वीयेऽन्तिमे काले नुवाकोटमगच्छत् । तत्र स्वनिधनात् पूर्वमाचार्यान् पुरोहितान् मौलान् बन्धून् महामात्रान् स्वबाल्योपस्थापकं रानावंश्यं सुरथसिंहमन्याञ् ज्ञानवृद्धान् वयोवृद्धांश्च स्वसन्निधौ सन्निपात्येमां वाचमगदत् ।

मङ्गलाचरणम्

भक्तानां सिद्धिदायी भवतु गणपतिर्विघ्नविध्वंसकारी,
सैन्यैः सार्धं व्रजन्ती क्षपयतु समरे कालिका शत्रुतेजः ।
स्मेरास्यश्चन्द्रचूडो भवतु पशुपतिश्चित्तसन्तापहारी,
योगी गोरक्षनाथो वितरतु सततं भावनां शुद्धरूपाम् ।।१।।

सिद्धिदायी । सुप्यजातौ णिनिस्ताच्छील्ये पा. ३।२।७८ इति सूत्रेण दाधातोर्णिनिप्रत्यये, आतो युक्चिण्कृतोः पा. ७।३।३३ इति सूत्रेण युगागमः ।

विघ्नविध्वंसकारी । सुप्यजातौ णिनिस्ताच्छील्ये पा. ३।२।७८ इति सूत्रेण कृधातोर्णिनिप्रत्यये, अचो ञ्णिति पा. ७।२।११५ इति सूत्रेण वृद्धिः ।

व्रजन्ती । व्रज्धातोः शतृप्रत्यये, उगितश्च पा. ४।१।६ इति सूत्रेण ङीपि, शप्श्यनोर्नित्यम् पा. ७।१।८१ इति सूत्रेण नुमागमः ।

क्षपयतु=नाशयतु । क्षै क्षये इति वक्ष्यमाणस्य कृतात्वस्य पुका निर्देशः । क्षपयति (सिद्धान्तकौमुद्यां भ्वादौ) ।

स्मेरास्यः=ईषद्हसितवदनः । नमिकम्पिस्म्यजसकमहिंसदीपो रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पा. ३।२।१६७ इति सूत्रेण स्मिङ्धातो रप्रत्यये स्मेरम्। स्मेरम् आस्यं वदनं यस्य सः स्मेरास्यः।

चन्द्रश्चूडायां शिखायां यस्य स चन्द्रचूडः।

चित्तसन्तापहारी। पूर्ववड् णिनिः।

योगी। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च पा. ३।२।१४२ इति सूत्रेण युज्धातोर्घिनुण्प्रत्यये, चजोः कु घिण्यतोः पा. ७।३।५२ इति सूत्रेण कुत्वम्।

वितरतु=ददातु।

त्यागो विहापितं दानमुत्सर्जनविसर्जने।

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्॥

(अमरः २।७।२६)

गणेशो विघ्नं नाशयतु। कालिका युद्धे शत्रून् नाशयतु। पशुपतिश्चित्तसन्तापं हरतु। गोरक्षनाथो मनःशुद्धिं करोतु।

भक्तैतद्देशभूपाभ्युदयशतकरी कालिका जागरूका
योगी गोरक्षनाथोऽपि च जयति सदा यत्र विघ्नं विनिघ्नन्।
शूराः सन्ति प्रजाः स्वप्रभुहितनिपुणा न्याययुक्ताः स्वतन्त्राः
सोऽयं गोर्खाभिधानो जगति विजयते कोऽपि रम्यः प्रदेशः॥२॥

इति वाग्वतीसेतुस्थे भीमसेनस्याऽभिलेखे वाणीविलासस्योक्तिः स्मरणीया।

[श्री ५ पृथ्वीनारायण शाहको उपदेश (राज्ञः पृथ्वीनारायणशाहस्योपदेशः) इतिनामकस्य ग्रन्थस्य ५२६ पृष्ठे]

गोरखाराज्यस्य संस्थानम्

याम्ये पार्श्वे हिमाद्रेर्धनददिशि महाभारताख्याद् महीध्राद्
मध्ये चम्पात्रिशूल्योर्वनगिरिबहुलं गोरखाराज्यमासीत्।

याम्ये=दक्षिणस्मिन्।

पार्श्वे=भागे।

धनददिशि=कुबेरदिशि=उत्तरस्याम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ।।
(अमरः १।१।७१-७२)

नेपालराष्ट्रे पूर्वापरायतास्तिस्रः पर्वतमाला वर्तन्ते । उत्तरस्यां हिमालयपर्वतमाला वर्तते । ततो दक्षिणस्यां महाभारताख्या पर्वतमाला वर्तते । ततोऽपि दक्षिणस्यां चूरेनाम्ना प्रसिद्धा पर्वतमाला वर्तते । हिमालयमहाभारतपर्वतमालयोरन्तरालवर्ती प्रदेशः पर्वतप्रदेश इत्युच्यते । महाभारतचूरेपर्वतमालयोरन्तरालवर्ती प्रदेश आभ्यन्तरोपत्यका (भित्री मधेस) कथ्यते । चूरेपर्वतमालाया दक्षिणस्यां वर्तमानः प्रदेशस् तराई मधेस वा कथ्यते । यस्य संस्कृतभाषायामुपत्यकेति नाम साधु भवेदिति मन्ये । गोरखाराज्यस्य हिमालयमहाभारतपर्वतमालयोरन्तर्वर्तित्वात् तद् राज्यं पर्वतीयमेवाऽसीत् ।

महीध्रात् =पर्वतात् ।
महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः ।
अद्रिगोत्रगिरिग्रावाऽचलशैलशिलोच्चयाः ।।
(अमरः २।३।१)

चम्पा =चेपे ।

वनगिरिबहुलम् । बहुलानि भूरीणि वनानि गिरयश्च यस्मिन् तद् वनगिरिबहुलम् ।

केशरिशरभशार्दूलवराहबहुलेषु तुषारशैलोपकण्ठेषु
इति हर्षचरिते पञ्चम उच्छ्वासे बाणस्योक्तिः ।

हिमालयाद् दक्षिणस्यां महाभारतनामकात् पर्वतादुत्तरस्यां चम्पा (चेपे) नद्याः पूर्वस्यां शूलोद्भवा (त्रिशूली) नद्याः पश्चिमायां बहुभिः पर्वतैर्वनैश्च शोभितं गोरखाराज्यं बभूव ।

गोरक्षाभिधपर्वतो विजयते गौरीगुरोर्दक्षिणे
कृष्णायाः सरितश्च पूर्वविषये शूलोद्भवापश्चिमे ।
यस्मिन् सिद्धवरोऽस्ति वै शिवतनुर्गोरक्षनाथाह्वय-
स्तन्मध्ये नगरी नगारिनगरीतुल्या तदाख्याञ्चिता ।।२।।

इति पृथ्वीन्द्रवर्णोदये ग्रंथमे सर्गे ललितावल्लभस्योक्तिः ।
(राज्ञः पृथ्वीनारायणशाहस्योपदेश इतिनामकस्य ग्रन्थस्य ४३७ पृष्ठे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पैतृके गोरखीये सिंहासने पृथ्वीनारायणस्याऽरोहणम्

शाहाख्यक्षत्रवंश्यो नवनवगिरिभू१७९९वैक्रमाब्दे नखा२०ब्दः
पृथ्वीनारायणोऽत्र स्वकुलसमुचितं भूमिपालत्वमाप ।।२।।

वंशे भवः=वंश्यः । दिगादिभ्यो यत् पा. ४।३।५४ इति सूत्रेण यत्प्रत्ययः । संख्या वंश्येन पा. २।१।१९

वंश्या गुणाः खल्वपि लोककान्ताः प्रारम्भसूक्ष्माः प्रथिमानमापुः ।
(रघुवंशे १८।४९)

राजबीजी राजवंश्यः ।
(अमरः २।७।२)

संवंहयन्तीं रघुवंश्यलक्ष्मीम् ।
(भट्टिः २।४८)

स्वकुलसमुचितम्=स्ववंशक्रमागतम् ।

स कुलोचितमिन्द्रस्य साहायकमुपेयिवान् ।
जघान समरे दैत्यं दुर्जयं तेन चाऽवधि ।।
(रघुवंशे १७।५)

कुलोचितं कुलाभ्यस्तमिति मल्लिनाथः ।

आप । आप्लृधातोर्लिटि प्रथमपुरुषैकवचने ।

एकोनशताधिकसप्तदशशत (१७९९) मिते वैक्रमाब्दे विंशति-(२०) वर्षः शाहोपनामकक्षत्रियभूपकुलजः पृथ्वीनारायणः पैतृकं गोरखासिंहासनं प्राप ।

नुवाकोटदुर्गस्य संस्थानं
पृथ्वीनारायणस्य विजययात्रायाः प्रारम्भश्च

प्राच्ये शूलोद्भवाया गिरिशिरसि नुवाकोटनाम्ना प्रसिद्धं
पाश्चात्त्यं सीमदुर्गं धनकरमभवत् कान्तिदेशाधिपस्य ।
पण्याध्वा भोटगामी धरणिरपि कृषेस्तेन संरक्ष्यते स्म,
यात्रादौ गोरखेशो विधुखगजमही१८०१ वैक्रमाब्देऽजयत् तत्।।३।।

प्राच्यम् । द्युप्रागपागुदक्प्रतीचो यत् पा ४।२।१०१ इति सूत्रेण शैषिको यत्प्रत्ययः ।

पाश्चात्त्यम् । दक्षिणापश्चात्पुरसस्त्यक् पा ४।२।९८ इति सूत्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैषिकस्त्यक्प्रत्ययः ।

धनकरम् । कृञो हेतुताच्छील्यानुलोम्येषु पा. ३।२।२० इति सूत्रेण हेत्वर्थे कृधातोष् टप्रत्ययः ।

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु पा. ३।१।१०१ पण्यमिति निपात्यते पणितव्यं चेद् तद् भवति । पण्यः कम्बलः । पण्या गौः । (काशिका)

विक्रेयं पणितव्यं च **पण्यम्** ।

(अमरः २।९।८२)

अयनं वर्त्म मार्गोऽध्वपन्थानः पदवी सृतिः ।

(अमरः २।१।१५)

पण्यानां विक्रेयवस्तूनामध्वा मार्गः पण्याध्वा=वणिक्पथः ।

भोटगामी । सुप्यजातौ णिनिस्ताच्छील्ये पा. ३।२।७८ इति सूत्रेण गम्धातोर्णिनिप्रत्यये, अत उपधायाः पा. ७।२।११६ इति सूत्रेणोपधाया वृद्धिः ।

धरणिः=भूमिः ।

भूर्भूमिरचलाऽनन्ता रसा विश्वंभरा स्थिरा ।

धरा धरित्री **धरणिः** क्षोणिर्ज्या काश्यपी क्षितिः ।।

(अमरः २।१।२)

कृषेर्धरणिः= क्षेत्राणि ।

संरक्ष्यते स्म । कर्मणि लट् । लट् स्मे पा. ३।२।११८ इति सूत्रेण भूतानद्यतनपरोक्षार्थता ।

मल्लवंश्यानां कान्तिपुराधिपानां पश्चिमा राज्यसीमा त्रिशूलीनदी बभूव । तस्या नद्याः समीपे नुवाकोटनाम्नि गिरिशिखरे कान्तिपुराधीशानामन्तपालदुर्गं बभूव । कान्तिपुराद् भोटगामिनो वणिक्पथस्य संरक्षणं धान्यैर्भूषितायास्तत्रत्याया भूमेः संरक्षणं च नुवाकोटदुर्गस्थो मल्लानामन्तपालश्चकार । तद् दुर्गं कान्तिपुराधीशानामायस्थानमासीत् । गोरखाराजः पृथ्वीनारायण एकाधिकाष्टादशशत (१८०१) मितस्य वैक्रमाब्दस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्याऽश्विनस्य पञ्चदशे (१५) दिवसे स्वकीयाया विजययात्राया इदं-प्रथमतया तद् दुर्गं जिगाय। (राज्ञः पृथ्वीनारायणशाहस्योपदेश इति-नामकस्य ग्रन्थस्य ७२१ पृष्ठे)

नुवाकोटदुर्गविषये विशेषविचारो राज्ञः पृथ्वीनारायणशाहस्यो-पदेश इतिनामकस्य ग्रन्थस्य १३३७–१३३९ पृष्ठेषु द्रष्टव्यः।

मल्लभूपानां बलक्षयः

नेपालद्रोणिदेशे कृतनिजकटकान् मल्लवंश्यान् नृपाँस्त्रीन्
षाड्गुण्यं सेवमानः स नृपतिरकरोत् क्षीणशक्तीन् क्रमेण।

कान्तिपुरललितपुरभक्तपुरनामकैस्त्रिभिर्नगरैः शोभिता वाग्वती-नीरसिक्ताऽस्माकं जन्मभूमिर्गिरिभिः परिवृता वर्तते। यदीयं वर्णनं राज्ञो द्वितीयजयदेवस्य पशुपतिमन्दिरस्थेऽभिलेखे

एषा भाति कुलाचलैः परिवृता प्रालेयसंसर्गिभि–
र्व्वेदी मेरुशिलेव काञ्चनमयी देवस्य विश्रामभूः।

[धनवज्रवज्राचार्यस्य लिच्छविकालका अभिलेख (लिच्छवि-कालिका अभिलेखाः) इतिनामकस्य ग्रन्थस्य ५५१ पृष्ठे)

इत्थं समुपलभ्यते।

यां वहवो जना नेपालोपत्यकेति ब्रुवन्ति। अहमपि तथैवाऽब्रवम्। पण्डितस्य जयचन्द्रविद्यालङ्कारस्य गोरखाली इतिहासकी मुख्य धाराएँ (गोरखेतिहासस्य मुख्याः प्रवाहाः) इतिनामकस्य ग्रन्थस्य २५–२६ पृष्ठयोः पुराणानामितिहासानाञ्च प्रमाणान्युद्धृत्य पर्वतैः परिवृता भूमिः संस्कृतभाषायां द्रोणिरिति कथ्यत इति साधितं वर्तते। तदनु

लङ्कादेशाद्धिमगिरिरुदग्घेमकूटोऽथ तस्मात्
तस्माच्चान्यो निपध इति ते सिन्धुपर्यन्तदैर्घ्याः।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला
वर्षाण्येषां जगुरिह बुधा अन्तरे द्रोणिदेशान्॥२६॥

(सिद्धान्तशिरोमणौ गोलाध्याये भुवनकोशे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भास्करस्येदं वचनं मम स्मृतिपथमारोहत् । जयचन्द्रस्याऽयं विचारो मम मनसि साधुः प्रतिभाति । अतो मया पूर्वनिर्दिष्टानां त्रयाणां नगराणामाधारभूमेर्बोधनाय नेपालद्रोणिशब्दः प्रयुक्तः ।

कटकम् = राजधानी ।

कटकोऽस्त्री नितम्बेऽद्रेर्दन्तिनां दन्तमण्डने ।।

सामुद्रलवणे राजधानीवलययोरपि ।

(मेदिनी १।५६-५७)

भर्तृभ्रूभेदभीतोद्भटकटकभटाकृष्टदुःश्लिष्टकेश-

भ्रञ्चद्वाचाटचेटोत्कटरटितकटुग्रन्थिपाशोपगूढः ।

क्षुत्तृट्क्षामोष्ठकण्ठस्त्यजति स सपदि व्यापदं तां दुरन्तां

यो यायादार्यताराचरणशरणतां स्निग्धबन्धूज्झितोऽपि ।।१६।।

(सर्वज्ञमित्ररचिते स्रग्धरास्तोत्रे)

जिनरक्षितकृतायां तट्टीकायाम्

कटके ये भटा राजधान्यां प्रेष्यवीराः

षाड्गुण्यम् ।

सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यमित्याचार्याः ।।२।। तत्र पणबन्धः सन्धिः ।।६।। अपकारो विग्रहः ।।७।। उपेक्षणमासनम् ।।८।। अभ्युच्चयो यानम् ।।९।। परार्पणं संश्रयः ।।१०।। सन्धिविग्रहोपादानं द्वैधीभाव इति षड्गुणाः ।।११।।

(कौटलीयेऽर्थशास्त्रे ७।१)

सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ।

षड् गुणाः

(अमरः २।८।१८-१९)

क्षीणः । अकर्मकात् क्षिधातोः, गत्यर्थाऽकर्मकश्लिषशीङ्स्थाऽऽस-वसजनरुहजीर्यतिभ्यश्च पा. ३।४।७२इति सूत्रेण कर्त्रर्थे क्तप्रत्ययः । निष्ठा-यामण्यदर्थे पा. ६।४।६० इति सूत्रेण दीर्घे क्षी त । क्षियो दीर्घात् पा. ८।२।४६ इति सूत्रेण नत्वे क्षी न । णत्वे क्षीण ।

क्षीणाः शक्तयो येषां त इति बहुव्रीहौ क्षीणशक्तयः । तान् क्षीण-शक्तीन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रीन् षाड्गुण्यम्। तोः षि पा. ८।४।४३ इति सूत्रेण ष्टुत्वाभावः।

त्रीन् मल्लवंश्यान् नृपान्। कान्तिदेशाधिपं भक्तपुराधिपं ललितपुराधिपम्।

एषां त्रयाणामपि मल्लभूपानां राजधान्यः कान्तिपुरं भक्तपुरं ललितपुरञ्च नेपालद्रोण्यामेवाऽऽसन्। राष्ट्राणि (राज्यक्षेत्राणि) तु तां द्रोणीं परितो बाह्यान् दश पञ्चदश क्रोशान् व्याप्तानि बभूवुः। कदाचित् कुत्रचित् कस्यचिद् राज्ञस्तु राज्यक्षेत्रं त्वासन्नत्रिंशान् क्रोशानपि व्याप।

पृथ्वीनारायणः स्वया षाड्गुण्यनिपुणया प्रतिभया कान्तिपुराधीशं ललितपुराधीशं भक्तपुराधीशञ्च क्रमेण क्षीणतां निनाय।

श्रीगोरक्षशतक्रतुः पुनरहो नेपालपालत्रयी–
मन्योन्यं प्रविदारयन् सुजगृहे तन्नीवृतः सर्वशः।
कृत्वा लम्बकपर्वतं निजमहो प्राच्यां द्विलक्षादिकान्
श्रीगङ्गावधिसंस्थितान् विदलयन्नन्यक्षमाभून्मनः ॥४३॥

इति पृथ्वीन्द्रवर्णोदये प्रथमे सर्गे।

(राज्ञः पृथ्वीनारायणशाहस्योपदेश इति नामकस्य ग्रन्थस्य ४४४ पृष्ठ)

पारावारद्विरदधरणीनायकैः १६८४ सम्मितेब्दे
राधे मासि त्रिदशगुरुणाधिष्ठिते मेषराशौ॥
नेपालेशान् सपदि विगताहङ्कृतीस्तान्विरच्य
पृथ्वीनारायणनृपतिना निर्म्मितन्दुर्गरत्नम् ॥१॥

इति नुवाकोटप्रासादस्थेऽभिलेखे।

(राज्ञः पृथ्वीनारायणशाहस्योपदेशनामकस्य ग्रन्थस्य ३६१ पृष्ठे)

(क्रमशः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्षिप्तायाः काशिकाया णत्वप्रकरणम्

– भोलानाथः पौडेलः

व्याकरणेषु पाणिनेरष्टकं सर्वोत्कृष्टमस्तीति सर्वे वैयाकरणाः स्वीकुर्वन्ति । तस्याध्ययनाध्यापनेषु विविधाः सरण्यः सन्ति । केचन रूपसाधनं मुख्यं मत्वा सिद्धान्तकौमुदीप्रमुखान् ग्रन्थानेव बहु मन्यन्ते । यद्यपि रूपसाधनार्थं सिद्धान्तकौमुदीप्रमुखा ग्रन्थाः सुबोधा इव दृश्यन्ते । परं लघुकौमुदीप्रमुखैः स्वल्पाकारैर्ग्रन्थैः समग्रं व्याकरणं ज्ञातुं न शक्यते, समग्रा सिद्धान्तकौमुदी विशालकाया वर्तते । अध्ययनसमये महता श्रमेण कण्ठस्थीकृताऽपि सा विशालकाया सिद्धान्तकौमुदी सदा कण्ठस्थीकर्तुं दुःशकेव भवति । यतोऽस्या ग्रन्थसङ्ख्या द्वादशसहस्रमिता वर्तते ।

सिद्धान्तकौमुद्या विशालता पाणिनेरष्टकस्य सूत्राणां क्रमं विहाय रूपसाधनानुकूलतया सूत्राणां विन्यासेन समुत्पन्ना । यथा—

'सुद्ध्युपास्य' इत्यत्र रूपसाधनार्थम्

इको यणचि ६।१।७७

अनचि च ८ ४।४७

स्थानिवदादेशोऽनल्विधौ ।१।१।५६

अचः परस्मिन् पूर्वविधौ ।१।१।५७

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्त्वविधिषु १।१।५८

झलां जश् झशि ८।४।५३

अदर्शनं लोपः १।१।६०

संयोगान्तस्य लोपः ८।२।२३

सूत्राणि सन्त्येकत्रीकृतानि । परं भिन्नभिन्नप्रकरणपठितानां तेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्राणामर्थबोधो वृत्त्या विना दुःशक एवाऽस्ते। तस्मात् सूत्रं वृत्तिरपि कण्ठस्थीकरणीयं भवत्येव।

सूत्रवृत्त्युदाहरणानां समवायेन जाताऽस्ति सिद्धान्तकौमुद्या विशालता। अस्मादेव कारणात् सिद्धान्तकौमुदीं समधीत्य व्याकरणं ज्ञातवन्तोऽपि जनास्तां सुचिरं कण्ठस्थां स्थापयितुं न प्रभवन्ति। ये प्रतिवर्षं सिद्धान्तकौमुदीं पाठयन्ति त एव तां कण्ठस्थां कर्तुं प्रभवन्ति। पाणिनेरष्टकस्य क्रममनतिक्रम्य पठने पाठने तु ग्रन्थस्य कण्ठस्थीकरणं सदा स्मरणं सुकरमिव भवति। सूत्रक्रमेण पठने वृत्तीनामावश्यकं न भवति। रूपसिद्धौ काठिन्यमिव तु दृश्यते। तदर्थं सिद्धान्तकौमुदीप्रमुखानां ग्रन्थानां साहाय्यग्रहणं साधु भवति। तदवस्थायां सूत्राणामेवाभ्यासेन समग्रं व्याकरणं सदैव मनसि स्थापयितुं शक्यते। यतः पाणिनेरष्टकस्य ग्रन्थसङ्ख्या सहस्रमितैवाऽस्ते। तावन्तं ग्रन्थं तु जनाः प्रत्यहमपि पठितुं प्रभवन्ति। पाणिनेरष्टकस्याऽध्ययने वर्तमानानेतान् गुणान् दृष्ट्वा वयं पाणिनेरष्टकमेव व्याकरणस्य मुख्यं पाठ्यपुस्तकं स्वीकुर्मः। पाणिनेरष्टकस्य साहाय्यार्थं भट्टिकाव्यं पठामः। पाणिनेरष्टके केवलानि सूत्राण्येव सन्ति नोदाहरणानि। सूत्रार्थानामवबोधाय धारणाय चोदाहरणानां भवत्यावश्यकम्। तदर्थमस्माभिः स्वीकृतो भट्टिकाव्यनामा ग्रन्थः। यत्र ग्रन्थे क्वचित् क्रमरूपेण क्वचिच्च प्रकीर्णरूपेण पाणिनेरष्टकस्योदाहरणानि प्रायो लभ्यन्ते। छन्दोबद्धत्वाच्च तस्य काव्यस्य भवत्येव कण्ठस्थीकरणे सारल्यम्। ग्रन्थसङ्ख्या सहस्रद्वयमिता वर्तते।

नाम्नामर्था लिङ्गानि च कानि भवन्तीत्यवबोधाय कस्याऽप्येकस्य कोशस्य भवत्यावश्यकम्। तदर्थं स्वीकृतोऽस्माभिः — अमरकोशः। यत्र पाणिनेरष्टकस्य बहून्युदाहरणानि लभ्यन्ते।[1] छन्दोबद्धत्वात् कण्ठस्थी-

---

१. समांसमां विजायते ५।२।१२

अस्य सूत्रस्योदाहरणम्—

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥

अमरः २।६।७२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करणे सरलोऽस्ति स कोशः । नाम्नामर्थादयश्च सुखेन ज्ञायन्ते । न भवति संशयः कुत्रापि । ग्रन्थसङ्ख्या पञ्चदशशतमिता वर्तते ।

संस्कृतभाषानिबद्धं गद्यकाव्यं विद्यार्थिनः पठितुं प्रभवन्त्वित्यबुद्धया हर्षचरितमस्माभिः पाठ्यपुस्तकत्वेन स्वीकृतम् । यत्र महाराजस्य हर्षस्य चरित्रं वर्णितम् । काव्येनानेन तदानीन्तनी लोकयात्रा च सुबोधा भवति । ग्रन्थः स पठनीयत्वेनैव स्थापितो न कण्ठस्थीकरणत्वेन ।

यस्याः कस्या अपि भाषाया व्याकरणस्य ज्ञानाय तस्या भाषाया ज्ञानं पूर्वमपेक्षितं भवति । अतः संस्कृतभाषानिबद्धानि लघूनि गद्यमयानि पद्यमयानि च पुस्तकानि पूर्वं पठन्ति बालका अस्मन्नियमानुसारम् । तानि यथालाभं यथारुचि च संस्कृतभाषानिपुणो गुरुः पूर्वं स्वशिष्यान् पाठयित्वा तेषां संस्कृतभाषायाः सामान्यं ज्ञानमुत्पादयति । ततः सामान्यबोधं प्राप्तवतः शिष्यान् गुरू रघुवंशकाव्यं पाठयेदित्यस्माकं नियमः ।

यत्र काव्ये दिलीप-रघ्वोः सच्चरितं तस्य सत्फलं तथा दशरथाग्निवर्णयोर्दुश्चरितं तस्य दुष्परिणामश्च सम्यग् वर्णितमस्ति । वर्णनादीनामपि न वर्तते कुत्रापि पुनरुक्तिः । प्रसादगुणेन च परिपूर्णमस्ति तत् काव्यम् ।

धान्यानां भवने क्षेत्रे खञ् ५।२।१
व्रीहिशाल्योर्ढक् ५।२।२
यवयवकषष्टिकाद्यत् ५।२।३
विभाषा तिलमाषोमाभङ्गाणुभ्यः ५।२। ४
एषां चतुर्णां सूत्राणामुदाहरणानि-
क्षेत्रं व्रैहेयशालेयं व्रीहिशाल्योर्द्ध्वोचितम् ॥
यव्यं यवक्यं षष्टिक्यं यवादिभवनं हि तत् ।
तिल्यतैलीनवन्माषोमाणुभङ्गाद् द्विरूपता ॥
मौद्गीन-कौद्रवीणादि शेषधान्योद्भवत्तमम् ।

अमरः २। ६। ६-८

इत्थं दर्शितान्यमरकोशे । एवं बहूनां सूत्राणामुदाहरणानि लभ्यन्तेऽमरकोशे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य काव्यस्य यः कोऽपि श्लोकः प्रभवति मनोमोदयितुं विदुषाम् । ग्रन्थ-सङ्ख्या च सहस्रद्वयमिता ।

एवमस्माभिः पञ्च ग्रन्थाः पाठ्यपुस्तकत्वेन स्वीकृताः । तेषु पञ्चसु ग्रन्थेषु पाणिनेरष्टकं सूत्रात्मकमस्ति । तस्मात्तस्याऽध्ययनाऽध्यापनाय भवति व्याख्याग्रन्थस्याऽवश्यकम् । तदर्थं जयादित्य-वामनाभ्यां विरचिता 'काशिका' नाम वृत्तिः पाणिनेरष्टकस्यार्थबोधाय स्वीकृताऽस्माभिः ।

तत्र काशिकावृत्तावपि स्थाने स्थाने सूत्रेभ्यो बहिर्गता विषया वर्तन्ते । ते च विषयाः व्याकरणशास्त्रं प्रविविक्षूणां छात्राणां सुबोधा न भवन्ति ।

सा काशिकावृत्तिः सुबोधा भवतु, पाणिनेरष्टकस्यार्थबोधे चच्छात्राः क्लेशं नानुभवन्त्विति बुद्धया काशिकायां स्थाने स्थाने वर्तमानान् सूत्रबहि-र्गतान् विषयान् विहाय पञ्चसु पाठ्यग्रन्थेषु (हर्षचरिते[1] भट्टिकाव्ये, अमरकोशे, रघुवंशकाव्ये, पाणिनेरष्टके च) समुपलब्धैर्विशेषोदाहरणैश्च संयोज्य 'संक्षिप्तां काशिकां' सम्पादयितुं समुद्यताः स्मो वयम् ।

इदानीं सम्पादकेषु कोऽप्येकोऽहं संक्षिप्तायाः काशिकायाः स्वल्पतरं भागं णत्वप्रकरणं प्रकाशयितुं प्रवृत्तोऽस्मि ।

रषाभ्यां नो णः समानपदे ।।१।।

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति समानपदस्थौ चेन्निमित्तनिमित्तिनौ भवतः । आस्तीर्णम् । कुष्णाति । पुष्णाति । सुष्णाति । समानपद इति किम् ? अग्निर्नयति । ऋवर्णाच्चेति वक्त-व्यम् तिसृणाम् । चतसृणाम् । मातृ णाम् । पितृ णाम् ।

सुष्णन्तमिव तेजांसि विस्तीर्णोरस्स्थलं पुरः ।
उपसेदुर्दशग्रीवं गृहीत्वा राक्षसाः कपिम् ।। भट्टि. ६।६२

---

१ उदाहरणपरिचयस्य काठिन्याद्धर्षचरितस्योदाहरणानि प्रायो न दत्तानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपूपजन् विष्टरपाद्यमाल्यैरातिथ्यनिष्णा वनवासिमुख्याः ।
भट्टि. २।२६

ततो नदीष्णान् पथिकान् गिरिज्ञानाह्वायकान् भूमिपतेरयोध्याम् ।
दित्सुः सुतां थोधहरैस्तुरङ्गैर्व्यसर्जयन् मैथिलमर्त्यमुख्यः ॥
भट्टि. २।४३

नाऽस्यं पश्यति यस्तस्या निंस्ते दन्तच्छदं न सा ।
संशृणोति न चोक्तानि मिथ्याऽसौ विहितेन्द्रियः ॥ भट्टि. ५।१६
एवं वदन् दाशरथिरपृणग् धनुषा शरम् ॥ भट्टि. ६।३६
संशृणुष्व कपे मत्कैः संगच्छस्व वनैः शुभैः । भट्टि. ८। १६

दृष्ट्वा सुषुप्तं राजेन्द्रं पापोऽयं विषमाऽशयः ।
चारकर्मणि निष्णातः प्रविष्टः प्रमदावनम् ॥ भट्टि. ६।८२
अथाञ्चितोरस्कमुदीर्णदृष्टिः कृत्वा विवृत्तापवणं शरीरम् ।
विवृत्तपाणिर्विहितोत्तरार्थं विभीषणोऽभाषत यातुधानान् ॥
भट्टि. १२।२१

रामस्तुष्यतु मे वाऽद्य पापां प्लुष्णातु वाऽनलः ॥ भट्टि. २०।३४
प्रवपाणि वपुर्वह्नौ रामाऽहं शङ्किता त्वया ।
सर्वे विदन्तु शृण्वन्तु भवन्तः सप्लवङ्गमाः ॥ भट्टि. २०।३६

दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम । अमर. १।४।२१
प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि । अमर. २।६।४२
प्रवीणे निपुणाऽभिज्ञ-विज्ञ-निष्णात-शिक्षिताः । अमर. ३।१।४
ह्रस्वादीर्णं उद्गूर्णोद्यते काचितशिक्यिते । अमर. ३।१।८६
प्रकृतिप्रत्ययार्थाद्यैः संकीर्णं लिङ्गमुन्नयेत् । अमर. ३।२। १

ष्णान्ता षट् । पा. १।१।२४
नृणोतेराच्छादने । पा. ३।३।५४
अक्ष्णोऽदर्शनात् । पा. ५।४।७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपृनृतृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृ-
प्रशास्तृणाम् । पा. ६।४।११

स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा । पा. ७।४।८१

सूत्रं प्रतिष्णातम् । पा. ८।३।९०

मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः । रघु. १।४
आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः । रघु. १।५०
त्वमात्मनस्तुल्यमसुं वृणीष्व रत्नं समागच्छतु काञ्चनेन । रघु. ६।७६
श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले ।
अङ्के निक्षिप्तचरणमास्तीर्णकरपल्लवे । रघु. १०।८
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिहराऽभवत् । रघु. १२।५१

कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कंधरामातिरश्चीं
ग्रीवेनाहन्यमानं तुहिनकणमुचा चञ्चलां केसरेण ।
निद्राकण्डूकषायं कपति निबिडितश्रोत्रशुक्तिस्तुरङ्ग-
स्त्वङ्नत्पक्ष्माग्रलग्नप्रतनुबुसकणं कोणमर्दणः खुरेण ॥ हर्ष. ३।६

अट्कुप्वाङ्नुम्व्यवायेऽपि ॥२॥

अट् कवर्ग पवर्ग आङ् नुम् इत्यैर्व्यवायेऽपि रेफषकाराभ्यामुत्तरस्य नकारस्य णकार आदेशो भवति । अड्व्यवाये तावत्-करणम् । हरणम् । किरिणा । गिरिणा । कुरुणा । गुरुणा । अटा कवर्गेण च व्यवाये- अर्केण । मूर्खेण । गर्गेण । अर्घेण । अटा पवर्गेण च व्यवाये- दर्पेण । रेफेण । गर्भेण । चर्मणा । वर्मणा । अटा आङा च व्यवाये- पर्याणद्धम् । निराणद्धम् । अटा नुमा च व्यवाये- वृंहणम् । वृंहणीयम् । अडादीनामिह व्यस्तैः समस्तैर्व्यवायेऽपि णत्वं भवति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुधा भिन्नमर्माणो भीमाः क्षरणसादयः। भट्टि. ६।६३
तैर्वृक्णरुरणसम्भुग्नत्रुरणभिन्नविपन्नकैः।
निमग्नोद्विग्नसंह्लीणैः पप्रे दीनैश्च मेदिनी॥ भट्टि. ४।४२
नैवेन्द्राणी न रुद्राणी न मनावी न रोहिणी। भट्टि. ५।२२
शत्रून् भीषयमाणं तं रामं विस्मापयेत कः। भट्टि. ५। ५८
परस्त्रीभोगहरणं धर्म एव नराऽशिनाम्। भट्टि. ६।१२२
एकेन वाली निहतः शरेण सुहृत्तमस्ते रचितश्च राजा।
यदैव सुग्रीवकपिः परेण तदैव कार्यं भवतो विनष्टम्॥ भट्टि. १२।३७
रामोऽपि दाराहरणेन तप्तो वयं हतैर्बन्धुभिरात्मतुल्यैः।
तप्तस्य तप्तेन यथाऽयसो नः सन्धिः परेणाऽस्तु विमुञ्च सीताम्॥
भट्टि. १२।४०

दश दन्तिसहस्राणि रथिनां च महात्मनाम्।
चतुर्दश सहस्राणि साऽरोहाणां च वाजिनाम्॥ भट्टि. १७।६७

शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला। अमर. १।१।३७
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः। अमर. १।४।२१
अर्याणी स्वयमर्या स्यात् क्षत्रिया क्षत्रियाण्यपि। अमर. २।६।१४
विश्राणनं वितरणं स्पर्शनं प्रतिपादनम्। अमर. २।७।२६
पर्येषणा परीष्टिश्चाऽन्वेषणा च गवेषणा। अमर. २।७।३२
आवाणौ शैलपाषाणौ पत्त्रिणौ शरपक्षिणौ।
वरुशैलौ शिखरिणौ शिखिनौ वह्निबर्हिणौ॥ अमर. ३।३।१०६

उदोऽनूर्ध्वकर्मणि। पा. १।३।२४
विशेषणं विशेष्येण बहुलम्। पा. २।१।५७
करणाधिकरणयोश्च पा. ३।३।११७

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥ रघु. १।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना । रघु. १।६४

शस्त्रेण रक्ष्यं यदशक्यरक्ष्यं न तच्छः शस्त्रभृतां क्षिणोति ॥

रघु. २।४०

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।

रघु. २।५५

गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवान् ॥

स एवमुक्त्वा मघवन्तमुन्मुखः करिष्यमाणः सशरं शरासनम् ।

अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडम्बितेश्वरः ॥

रघोरवष्टम्भसमेन पत्त्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः ।

रघु. ३।५१-५३

रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वाङ्गमिवेश्वरेण ।

काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशम् ॥

रघु. ६।२

ततस्तदालोकनतत्पराणां सौधेषु चामीकरजालवत्सु ।

बभुवुरित्थं पुरसुन्दरीणां, त्यक्तान्यकार्याणि विचेष्टितानि ॥

रघु. ७।५

कुर्वन्नाभुग्नपृष्ठो मुखनिकटकटिः कंधरामातिरश्चीं

लोलेनाहन्यमानं तुहिनकणरुचा चञ्चला केसरेण ।

निद्राकण्डूकषायं कषति निबिडितश्रोत्रशुक्तिस्तुरङ्ग-

स्त्वङ्नत्पक्ष्माग्रलग्नप्रतनुबुसकणं कोणमक्ष्णः खुरेण ॥ हर्ष. ३।६

पूर्वपदात् संज्ञायामगः ॥३॥

गकारवर्जितात् पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो भवति, संज्ञायां विषये । द्रुणसा । वार्द्रीणसः । त्रसरणसः । शूर्पणखा । संज्ञायामिति किम् ? चर्मनासिकः । अग इति किम् ? अगयनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुधा भिन्नमर्यादा भीमाः खरणसादयः । भट्टि. ६।६३
अहं शूर्पणखा नाम्ना नूनं नाज्ञायिषि त्वया । भट्टि. ४।१२
हतबन्धुर्जगामाऽऽशौ ततः शूर्पणखा वनात् । भट्टि. ५।४
रत्नपारायणं नाम्ना लङ्केति मम मैथिलिः ॥ भट्टि. ५।८६

मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका । अमर. १।१।४६
मृगशीर्षं मृगशिरस्तस्मिन्नेवाऽग्रहायणी । अमर. १।३।२३
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः । अमर. १।४।१४
खरणाः स्यात् खरणसो विभ्रस्तु गतनासिकः ।
खुरणाः स्यात् खुरणसः प्रङ्गः प्रगतजानुकः । अमर. २।६।४६-४७
साकल्यासङ्गवचने पारायणतुरायणे । अमर. ३।२।२

संवत्सराऽग्रहायणीभ्यां ठञ् च । पा. ४।३।५०
प्रत्युदाहरणम्- अणयनादिभ्यः । पा. ४।३।७३
पारायणतुरायणचान्द्रायणं वर्त्तयति । पा. ५।१।७२
नदीबन्धुभ्यां ह्रस्वाग्रहायणीभ्यः । पा. ५।४।११०

रूपं शूर्पणखा नाम्नः सदृशं प्रत्यपद्यत । रघु. १२।३८
राघवास्त्रविदीर्णानां रावणं प्रति रक्षसाम् ।
तेषां शूर्पणखैवैका दुष्प्रवृत्तिरऽभवत् ॥ रघु. १२।५१
बभूव वज्राकरभूषणायाः पतिः पृथिव्याः किल वज्रणाभः ।
रघु. १८।२१

वनं पुरगामिश्रकासिध्रकाशारिकाकोटराग्रेभ्यः ॥४॥

पूर्वपदात् संज्ञायामिति वर्तते । पुरगा मिश्रका सिध्रका शारिका कोटरा अग्रे इत्येतेभ्यः उत्तरस्य वनशब्दस्य णकार आदेशो भवति, संज्ञायां विषये । पुरगावणम् । मिश्रकावणम् । सिध्रकावणम् । शारिकावणम् । कोटरावणम् । अग्रेवणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्रेवणं वर्तमाने प्रतीच्यां चन्द्रमण्डले ॥ भट्टि. ६।६३

प्रनिरन्तः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि ॥५॥

प्र निर् अन्तर् शर इक्षु प्लक्ष आम्र काश्मर्य खदिर पीयूक्षा इत्येतेभ्य उत्तरस्य वननकारस्य णकार आदेशो भवति, संज्ञायामसंज्ञायामपि। प्र-प्रवणे यष्टव्यम्। निर्-निर्वणे प्रतिधीयते। अन्तर्वणे। शरवणम्। इक्षुवणम्। प्लक्षवणम्। आम्रवणं। काश्मर्यवणम्। खदिरवणम्। पीयूक्षावणम्।

निर्वणं कृतमुद्यानमनेनाऽम्रवणाऽदिभिः। भट्टि. ६।६४
अथाञ्चितोरस्कमुदीर्णदृष्टिः कृत्वा विवक्षाप्रवणं शरीरम्।
विवृत्तपाणिर्विहितोत्तरार्थं विभीषणोऽभाषत यातुधानान्॥
भट्टि. १७।२१

प्रवणः क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे। अमर.। ३।३।५६

विभाषौषधिवनस्पतिभ्यः ॥६॥

वनमित्येव। ओषधिवाचि यत् पूर्वपदं वनस्पतिवाचि च तत्स्थान्निमित्तादुत्तरस्य वननकारस्य विभाषा णकार आदेशो भवति। ओषधिवाचिभ्यस्तावत्-दूर्वावणम्, दूर्वावनम्। मूर्वावणम्, मूर्वावनम्। वनस्पतिभ्यः- शिरीषवणम्, शिरीषवनम्। वदरीवणम्, वदरीवनम्। द्व्यचः इति वक्तव्यम् इह मा भूत्- देवदारुवनम्। भद्रदारुवनम्।

देवदारुवनाद्भिन्नैरित्युर्वानरद्विपः॥ भट्टि. ६।६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अह्नोऽदन्तात् ।।७।।

अदन्तं यत् पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य अह्नो नकारस्य णकार आदेशो भवति। पूर्वाह्णः। अपराह्णः। अदन्तादिति किम्? निरह्नः। दुरह्नः।

उपास्थिषत संप्रीताः पूर्वाह्णे रोषवाहणम्। भट्टि. ६।६५

प्राह्णापराह्णमध्याह्नास्त्रिसन्ध्यमथ शर्वरी। अमर. १।४।३

सायञ्चिरम्प्राह्णे प्रगेऽव्ययेभ्यष्टयुट्युलौ तुट् च। पा. ४।३।२३
विभाषा पूर्वाह्णापराह्णाभ्याम्। पा. ४।३।२४
पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन्। पा. ४।३।२८
महान् व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारत-
हैलिहिलरौरवप्रवृद्धेषु। पा. ६।२।३८

वाहनमाहितात् ।।८।।

आहितवाचि यत् पूर्वपदं तत्स्थान्निमित्तादुत्तरस्य वाहननकारस्य णकार आदेशो भवति। इक्षुवाहणम्। शरवाहणम्। दर्भवाहणम्। वाहने यद् आरोपितमुह्यते तद् आहितमुच्यते। आहितादिति किम्? दात्रिवाहनम्, दात्रिस्वामिकं वाहनमित्यर्थः।

उपास्थिषत संप्रीताः पूर्वाह्णे रोषवाहणम्। भट्टि. ६।६५

पानं देशे ।।९।।

पूर्वपदस्थान्निमित्तादुत्तरस्य पाननकारस्य णकार आदेशो भवति, देशाभिधाने। पीयत इति पानम्। 'कृत्यल्युटो बहुलम् ३।३।११३' इति कर्मणि ल्युट्। क्षीरं पानं येषां ते क्षीरपाणाः उशीनराः। मनुष्याभिधाने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपि देशाभिधानं गम्यते । सुरापाणाः प्राच्याः । सौवीरपाणाः बाह्लीकाः । कषायपाणाः गान्धाराः । देश इति किम् ? दाक्षीणं पानं दाक्षिपानम् ।

वा भावकरणयोः ।।१०।।

भावे करणे च पूर्वपदस्थान्निमित्तादुत्तरो यः पानशब्दः तदीय-नकारस्य वा णकार आदेशो भवति । क्षीरपाणं वर्तते, क्षीरपानम् । कषाय-पाणम्, कषायपानम् । सुरापाणम्, सुरापानम् । करणे-क्षीरपाणः कंसः, क्षीरपानः ।

सुरापाणपरिक्षीबं रिपुदर्पहरोदयम् ।
परस्त्रीवाहिनं प्रापुः साविष्कारं सुरापिणः ।। भट्टि. ६। ६६

वीरपाणं तु तत्पानं वृत्ते भाविनि वा रणे । अमर. २। ८। १०३

प्रातिपदिकान्तनुम्विभक्तिषु च ।।११।।

प्रातिपदिकान्ते नुमि विभक्तौ च यो नकारः पूर्वपदस्थान्निमित्तादुत्तरः, तस्य णकार आदेशो वा भवति । प्रातिपदिकान्ते तावत्- माषवापिणौ, माषवापिनौ । नुमि-माषवापाणि, माषवापानि । व्रीहिवापाणि, व्रीहि-वापानि । विभक्तौ-माषवापेण, माषवापेन । व्रीहिवापेण, व्रीहिवापेन ।

सुरापाणपरिक्षीबं रिपुदर्पहरोदयम् ।
परस्त्रीवाहिनं प्रापुः साविष्कारं सुरापिणः ।। भट्टि. ६ ।६६
उपास्थिपत संप्रीताः पूर्वाह्णे रोषवाहणम् ।
राक्षसाः कपिमादाय पतिं रुधिरपायिणाम् ।। भट्टि. ६ ।६५

एकाजुत्तरपदे णः ।।१२।।

एकाजुत्तरपदं यस्य स एकाजुत्तरपदः तस्मिन्नेकाजुत्तरपदसमासे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य नित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णकार आदेशो भवति । वृत्रहणौ, वृत्रहणः । नुमि- क्षीरपाणि । सुरापाणि । विभक्तौ-क्षीरपेण । सुरापेण ।

सुरापाणपरिक्षीबं रिपुदर्पहरोदयम् ।
परस्त्रीबाहिनं प्रापुः साविष्कारं सुरापिणः ॥ भट्टि. ६। ६५

कुमति च ।।१३।।

कवर्गवति चोत्तरपदे प्रातिपदिकान्तनुम्विभक्तिषु पूर्वपदस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो भवति । वस्त्रयुगिणौ, वस्त्रयुगिणः । स्वर्गकामिणौ, स्वर्गकामिणः । वृषगामिणौ । नुमि- वस्त्रयुगाणि । खरयुगाणि । विभक्तौ-वस्त्रयुगेण । खरयुगेण ।

सङ्कर्षयोगिणः पादौ प्रणेमुस्त्रिदशद्विषः । भट्टि. ६। ६६

उपसर्गादसमासेऽपि णोपदेशस्य ।।१४।।

ण उपदेशे यस्यासौ णोपदेशः । णोपदेशस्य धातोरुपसर्गस्थान्निमित्तादुत्तरो यो नकारः तस्य णकार आदेशो भवति, असमासेऽपि । प्रणमति । परिणमति । प्रणायकः । परिणायकः । णोपदेशस्येति किम्? प्रनर्दति । प्रनर्दकः ।

सङ्कर्षयोगिणः पादौ प्रणेमुस्त्रिदशद्विषः । भट्टि. ६।६७
जज्वाल लोकस्थितये स राजा यथाऽध्वरे वह्निरभिप्रणीतः ॥ भट्टि.१।४
विद्युत्प्रणाशं स वरं प्रनष्टो यद्वोर्ध्वशोषं तृणवच्च शुष्कः । भट्टि. ३।१४
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् ॥ भट्टि. ४।१४
ओजायमाना तस्यार्घ्यं प्रणीय जनकात्मजा ।
उवाच दशमूर्धानं सादरा गद्गदं वचः ॥ भट्टि ५।७६
प्रणश्यन्नपि नाऽशक्नोदत्येतुं बाणगोचरम् ॥ भट्टि. ६।१३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतेऽतिभूमिं प्रणये प्रयुक्तानबुद्धिपूर्वं परिलुप्तसंज्ञः ।
आत्मानुभूतानपि नोपचारान् स्मरातुरः संस्मरति स्म लोकः ॥
भट्टि. ११।२६

सिंहासनोपाश्रितचारुबाहुरध्यास्त पीठं विहितप्रणामः ॥ भट्टि.१२।१२

मा पादयुद्धं द्विरदेन कार्षीर्नमं क्षितीन्द्रं प्रणतोपभोग्यम् ॥
भट्टि. १२।३६

वदन्ति दुःखं ह्यनुजीविवृत्तो स्थिताः पदस्थं परिणामपथ्यम् ॥
भट्टि.१२।७४

लवणजलबन्धकामा आरूढा अम्बरं महापरिणाहम् ॥भट्टि. १३।२२

ततः प्रणीताः कपियूथमुख्यैर्न्यस्ताः कृशानोस्तनयेन सम्यक् ।
अकम्प्रबन्धाऽग्रनितम्बभागा महार्णवं भूमिभृतोऽवगाढाः॥भट्टि.१३।२६

आस्फोटयाञ्चक्रुरभिप्रणेदू रेजुर्ननन्दुर्विययुः समीयुः ॥ भट्टि.१३।२८
चञ्चलतुरङ्गवारणसङ्घट्टाऽबद्धचारुपरिणाहगुणम् ॥ भट्टि. १३।४६
प्राणशन् नासिकाभ्यां च वक्त्रेण च वनौकसः । भट्टि.१५।४६
प्रणंस्यत्यद्य देवेन्द्रस्त्वां वक्ष्यति स सन्नतिम् ॥भट्टि.१६। ३६
गत्वा प्रणम्य तेनोक्ता मैथिली मधुरं वचः ॥ भट्टि. २०। ६
प्रणमन् ब्रह्मणा प्रोक्तो राजकाधिपतिस्ततः । भट्टि. २१। १३

सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ । अमर. १।५।३
शिक्षेत्यादि श्रुतेरङ्गमोङ्कारप्रणवौ समौ । अमर. १।६।४
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः । अमर. १।६।११
दैर्घ्यमायाम आनाहः परिणाहो विशालता । अमर. २।६।११४
अग्नित्रयमिदं त्रेता प्रणीतः संस्कृतो ऽनलः । अमर २।७।२०
यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते । अमर. २।७।२१
तथा परिणयोद्वाहोपयामाः पाणिपीडनम् । अमर. २। ७।५६
राजा तु प्रणताशेषसामन्तः स्यादधीश्वरः । अमर. २।८।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणीतमुपसम्पन्नं प्रयस्तं स्यात् सुसंस्कृतम् । अमर. २।९।४५
निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः । अमर. २।१०।१०
परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् । अमर. २।१०।४५
वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः । अमर. ३।१।२५
निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवस्कृतम् । अमर. ३।१।५६
पक्वं परिणते गूनं हन्ने भीढं तु मूत्रिते । अमर. ३।१।५६
ईलितशस्तपणायितपनायितपणितपणितपनितानि । अमर. ३।१।१०६
परिणामो विकारो द्वे समे विकृतिविक्रिये । अमर. ३।२।१५
प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ । अमर ३।२।२५
निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः । अमर. ३।३।२०३

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्य-
खन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्यो-
पचाय्यपृडानि । पा.३।१।१२३
प्राणाय्योऽसंमतौ । पा. ३।१।१२८
प्रणवष्टेः । पा. ८।२।८६

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ रघु. १। ११
स्थित्यै दण्डयतो दण्ड्यान् परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः ॥ रघु. १।२५
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥
रघु. २।२१
तद् भूतनाथानुग ! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् ॥
रघु. २। ५८
युवा युगव्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकन्धरः ।
वपुःप्रकर्षादतयद् गुरुं रघुस्तथापि नीचैर्विनयादवर्तयत ॥ रघु. ३।३४
स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्विषः ।
महीध्रपक्षच्छिदुरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ॥ रघु.३।६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ रघु. ४। १७

प्रस्थानप्रणतिभिरङ्गुलीषु चक्रुर्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥
रघु. ४।८८

स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् । रघु. ५।५४

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥ रघु. ६। १२

ऋजुप्रणामक्रिययैव तन्वी प्रत्यादिदेशैनमभाषमाणा ॥ रघु. ६।२५

ताम्बूलवल्लीपरिणद्धपूगास्वेलालतालिङ्गितचन्दनासु ।
तमालपत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलयस्थलीषु ॥ रघु. । ६। ६४

गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः ।
पदवीं तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ॥ रघु. ८।११

उपहितं शिशिरापगमश्रिया मुकुलजालमशोभत किंशुके ।
प्रणयिनीव नखक्षतमण्डनं प्रमदया मदयापितलज्जया ॥ रघु. ९। ३१

सा हि प्रणयवत्यासीत्सपत्न्योरुभयोरपि । रघु. १०।५७

अप्यसुप्रणयिनां रघोः कुले न व्यहन्यत कदाचिदर्थिता ॥ रघु. ११। २

तौ प्रणामचलकाकपक्षकौ भ्रातराववभृथाप्लुतो मुनिः ।
आशिषामनुपदं समस्पृशद्गर्भपाटिततलेन पाणिना ॥ रघु. ११।३१

निर्जितेषु तरसा तरस्विनां शत्रुषु प्रणतिरेव कीर्तये । रघु. ११।८६

अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैर्वार्तानुयोगमधुराक्षरया च वाचा ॥
रघु. १३।७१

भर्तुः प्रणाशादथ शोचनीयं दशान्तरं तत्र समं प्रपन्ने ।
अपश्यतां दाशरथौ जनन्यौ छेदादिवोपप्लवरोर्व्रततयौ ॥ रघु । १४।१

तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः ।
प्राकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः ॥ रघु. १७।२२

प्राञ्जलिः प्रणयिनीः प्रसादयन्सोऽदुनोत्प्रणयमन्थरः पुनः ॥
रघु. १९।२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयति ज्वलत्प्रतापज्वलनप्राकारकृतजगद्रक्षः ।
सकलप्रणयिमनोरथसिद्धिश्रीपर्वतो हर्षः ॥ हर्ष. १।२१

हिनु मीना ।।१५।।

हिनु मीना इत्येतयोर्यो नकारः उपसर्गस्थान्निमित्तादुत्तरस्तस्य णकार आदेशो भवति । प्रहिणोति, प्रहिणुतः । प्रमीणाति, प्रमीणीतः ।

सङ्घर्षयोगिणः पादौ प्रणमुस्त्रिदशद्विषः ।
प्रहिण्वन्तो हनूमन्तं प्रमीणन्तं द्विषन्मतीः ॥ भट्टि. ६।६७
शङ्कां कृथा मा प्रहिणु स्वसूनुम् ॥ भट्टि. १।२१
एष शोकच्छिदो वीरान् प्रभो ! भम्प्रति वानरान् ।
धराशैलसमुद्राणामन्तगान् प्रहिणोम्यहम् ॥ भट्टि. ७।२७
प्राहिण्वन्नरिमुक्तानि शस्त्राणि विविधानि च ॥ भट्टि. १७।१४
रावणः प्राहिणोच्छूलं शक्तिं चैन्द्रीं महीपतिः ॥ भट्टि. १७।१००

प्राहिणोच्च महितं महाद्युतिः कोसलाधिपतये पुरोधसम् । रघु. ११।४६

आनि लोट् ।।१६।।

उपसर्गस्थान्निमित्तादुत्तरस्य लोडादेशस्य आनि इत्येतस्य नकारस्य णकार आदेशो भवति । प्रवपाणि । परिवपाणि । परियाणि ।

प्रवपाणि शिरो भूमौ वानरस्य वनच्छिदः । भट्टि. ६।६८
प्रवपाणि वपुर्वह्नौ रामाहं शङ्किता त्वया । भट्टि. २०।३६

नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्साति-
वपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ।।१७।।

उपसर्गस्थान्निमित्तादुत्तरस्य नेरित्येतस्य नकारस्य णकार आदेशो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति गद नद पत पद घुसंज्ञक मा दास्यति हन्ति याति वाति द्राति प्साति वपति वहति शाम्यति चिनोति देग्धि इत्येतेषु परतः। गद- प्रणिगदति। परिणिगदति। नद- प्रणिनदति। परिणिनदति। पत- प्रणिपतति। परिणिपतति। पद- प्रणिपद्यते। परिणिपद्यते। घु- प्रणिददाति। परिणिददाति। प्रणिदधाति। परिणिदधाति। माङ्- प्रणिमिमीते। परिणिमिमीते॥ मा इति माङ्मेङोर्ग्रहणमिष्यते॥ मेङ्- प्रणिमयते। परिणिमयते। स्यति- प्रणिष्यति। परिणिष्यति। हन्ति- प्रणिहन्ति। परिणिहन्ति। याति- प्रणियाति। परिणियाति। वाति- प्रणिवाति। परिणिवाति। द्राति- प्रणिद्राति। परिणिद्राति। प्साति- प्रणिप्साति। परिणिप्साति। वपति- प्रणिवपति। परिणिवपति। वहति- प्रणिवहति। परिणिवहति। शाम्यति- प्रणिशाम्यति। परिणिशाम्यति। चिनोति- प्रणिचिनोति। परिणिचिनोति। देग्धि- प्रणिदेग्धि। परिणिदेग्धि। अड्व्यवायेऽपि गदादिषु नेर्णत्वमिष्यते- प्रण्यगदत्।

प्रण्यगादीत् प्रणिघ्नन्तं घनः प्रणिनदन्निव।
ततः प्रणिहितः स्वार्थे राक्षसेन्द्रं विभीषणः॥
प्रणिशाम्य दशग्रीव! प्रणियातुमलं रुषम्। भट्टि. ६।६६-१००
धर्मोऽस्ति सत्यं तव राक्षसाऽयमन्यो व्यतिस्ते तु ममापि धर्मः।
ब्रह्मद्विषस्ते प्रणिहन्मि येन राजन्यवृत्तिर्धृतकार्मुकेषुः॥ भट्टि.२।३५
तौ वालिप्रणिधी मत्वा सुग्रीवोऽचिन्तयत् कपिः। भट्टि. ६।८६
किष्किन्धाऽद्रिगुहां गन्तुं मनः प्रणिदधे द्रुतम्॥ भट्टि. ६।१४२
राक्षसानां मयि गते रामः प्रणिहनिष्यति। भट्टि. ८।१२१
प्रादुःषन्ति न संत्रासा यस्य रक्षःसमागमे।
तस्य क्षत्रियदुःषृतेरयं प्रणिधिरागतः भट्टि. ६।८१
प्रणिपत्य ततो वचनं जगाद हितमाबवो पवितर्वारीणाम्॥ भट्टि.१३।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवधानं समाधानं प्रणिधानं तथैव च । अमर. १।५।२ क्षे.
यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः । अमर. २।८।१३
प्राप्तप्रणिहिते समे । अमर.३। १।८६
प्रणिधिः प्रार्थने चरे । अमर. ३।३।१००

सोऽपश्यत् प्रणिधानेन सन्ततेः स्तम्भकारणम् । रघु. १।७४
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥
रघु. ३।१५

प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ रघु. ४।६४
पितरं प्रणिपत्य पादयोरपरित्यागमयाचतात्मनः ॥ रघु. ८।१२
अनयत् प्रभुशक्तिसम्पदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥ रघु. ८।१६
अथ तं सवनाय दीक्षितः प्रणिधानाद् गुरुराश्रमस्थितः ।
अभिषङ्गजडं विजज्ञिवानिति शिष्येण किलान्वबोधयत् ॥ रघु.८।७५
प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषाम् ।
अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरम् ॥ रघु. १०।१५
जाने विसृष्टां प्रणिधानतस्त्वां मिथ्याऽपवादच्युभितेन भर्त्रा ।
रघु. १४।७२

सा सीतामङ्कमारोप्य भर्तृप्रणिहितेक्षणाम् ।
मा मेति व्याहरत्येव तस्मिन् पातालमभ्यगात् ॥ रघु. १५।८४
न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः ।
अदृष्टमभवत् किञ्चिद् व्यभ्रस्येव विवस्वतः ॥ रघु. १७।४८

शेषे विभाषाऽकखादावषान्त उपदेशे ।।१८।।

नेरिति वर्तते, उपसर्गादिति च। अककारखकारादिः अषकारान्तश्च उपदेशे यो धातुः शेषस्तस्मिन् परत उपसर्गस्थान्निमित्तादुत्तरस्य नेर्नकारस्य विभाषा णकार आदेशो भवति । प्रणिपचति, प्रनिपचति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रणिभिनत्ति, प्रनिभिनत्ति । अकखादाविति किम् ? प्रनिकरोति । प्रनिखादति । अपान्त इति किम् ? प्रनिपिनष्टि । उपदेशग्रहणं किम् ? इह च प्रतिषेधो यथा स्यात्- प्रनिचकार । प्रनिचखाद । प्रनिपेक्ष्यति । इह च मा भूत् विशेः- प्रणिवेष्टा । प्रणिवेक्ष्यति ।

प्रणिजानीहि हन्यन्ते दूता दोषे न सत्यपि ॥ भट्टि. ६।१००

अनितेः ॥१९॥

उपसर्गस्थान्निमित्तादुत्तरस्य, अनितेर्नकारस्य णकार आदेशो भवति । प्राणिति । पराणिति ।

प्राणयन्तमरिं प्रोचे राक्षसेन्द्रो विभीषणम् । भट्टि. ६।१०१
प्राणिवस्तव मानार्थं व्रजाऽश्वसिहि मा रुदः ॥ भट्टि. ४।३८
न प्राणिषि दुराचार ! मायानामीशिषे न च । भट्टि. ६।५७
न जिजीवाऽसुखी तातः प्राणता रहितस्त्वया । भट्टि. १४।५८
जग्लौ दध्यौ वितस्तानः क्षणं प्राण न विव्यथे । भट्टि.१४।६०
तत्रेषज्जाम्बवान् प्राणीदुदमीलीच्च लोचने ॥ भट्टि. १५।१०२
प्राणिषुर्निहताः केचित् केचित्त् प्रोदमीलिषुः । भट्टि. १५।१०८
उष्णं च प्राणतां दीर्घमुच्चैर्व्याक्रोशतां तथा ॥भट्टि. १७।२४
समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतः ॥ भट्टि. १८।१०

अन्तः ॥२०॥

अनितेरिति वर्तते । उपसर्गस्थान्निमित्तादुत्तरस्य पदान्ते वर्तमानस्य अनितेर्नकारस्य णकार आदेशो भवति । हे प्राण ! हे पराण । पदान्तस्य ८।४।३७ इति प्रतिषेधस्यापवादोऽयम् ।

उभौ साभ्यासस्य ॥२१॥

उपसर्गस्थान्निमित्तादुत्तरस्य साभ्यासस्याऽनितेरुभयोर्नकारयोर्णकार आदेशो भवति । प्राणिणत् । प्राणिणिषति । पराणिणत् ।

प्राणिणिषुर्न पापोऽयं थोऽभाङ्क्षीत् प्रमदावनम् । भट्टि. ६।१०१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हन्तेरत्पूर्वस्य ।।२२।।

उपसर्गस्थान्निमित्तादुत्तरस्य अकारपूर्वस्य हन्ति-नकारस्य णकार आदेशो भवति । प्रहण्यते । परिहण्यते । प्रहणनम् । परिहणनम् । अत्पूर्वस्येति किम् ? प्रघ्नन्ति । तपरकरणं किम् ? चिणि-प्राघानि । पर्घानि ।

प्रत्युदाहरणम्-प्राघानिषत रक्षांसि येनाऽघ्नानि वने मम । भट्टि. ६।१०२

प्रत्युदाहरणम्- शत्रुघ्नान् क्षुधि हस्तिघ्नो गिरीन् क्षिप्यन्नकृत्रिमान् । भट्टि. ६।११३

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् । पा. २।३।५६

वमोर्वा ।।२३।।

हन्तेरिति वर्तते । वकारमकारयोः परत उपसर्गस्थान्निमित्तादुत्तरस्य हन्तेर्नकारस्य णकार आदेशो वा भवति । प्रहण्वः, प्रहन्वः । परिहण्वः, परिहन्वः । प्रहण्मः, प्रहन्मः । परिहण्मः, परिहन्मः ।

न प्रहण्मः कथं पापं वद पूर्वापकारिणम् । भट्टि. ६।१०२

अन्तरदेशे ।।२४।।

अन्तः शब्दादुत्तरस्य अत्पूर्वस्य हन्तिनकारस्य णकार आदेशो भवति, अदेशाभिधाने । अन्तर्हण्यते । अन्तर्हणनं वर्तते । अदेश इति किम्? अन्तर्हननो देशः । अत्पूर्वस्येत्येव- अन्तर्घ्नन्ति । तपरकरणं किम् ? अन्तरघानि ।

वेश्माऽन्तर्हणनं कोपाग्मम शत्रोः करिष्यतः ।
मा कार्षीरन्तरयणं प्रयाणार्हमनेहसम् ।। भट्टि. ६।१०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनयं च ।।२५।।

अन्तरदेश इति वर्तते । अन्तशब्दादुत्तरस्य अयननकारस्य णकार आदेशो भवति, अदेशाभिधाने । अन्तरयणं वर्तते । अन्तरयणं शोभनम् । अदेश इत्येव-अन्तरयनो देशः ।

मा कार्षीरन्तरयणं, प्रयाणाऽर्हमवेह्यमुम् ।। भट्टि. ६।१०३

छन्दस्यृदवग्रहात् ।।२६।।

पूर्वपदादिति वर्तते । ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य नकारस्य णकार आदेशो भवति छन्दसि विषये । नृमणा । पितृषाणम् । अत्र हि नृमणाः पितृषाणमिति ऋकारोऽवगृह्यते ।

नश्च धातुस्थोरुषुभ्यः ।।२७।।

धातुस्थान्निमित्तात्, उरुशब्दात् षुशब्दाच्चोत्तरस्य नस् इत्येतस्य नकारस्य णकार आदेशो भवति छन्दसि विषये । धातुस्थात् तावत्-अग्ने रक्षा णः । शिक्षा णो अस्मिन् । उरुशब्दात्-उरुणस्कृधि । षुशब्दात्-अभीषु णः सखीनाम् । ऊर्ध्व ऊषु ण ऊतये ।

उपसर्गाद् बहुलम् ।।२८।।

उपसर्गस्थान्निमित्तादुत्तरस्य नसो नकारस्य णकार आदेशो भवति बहुलम् । प्रणः शूद्रः । प्रणसः । प्रणो राजा । न च भवति- प्र नो मुञ्चतम् । बहुलग्रहणाद् भाषायामपि भवति- प्रणसं मुखम् ।

कृत्यचः ।।२९।।

कृत्यो यो नकारोऽच उत्तरः, उपसर्गस्थान्निमित्तादुत्तरस्य तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नकारस्य णकार आदेशो भवति । प्रयाणम् । परियाणम् । प्रमाणम् । परिमाणम् । प्रयायमाणम् । परियायमाणम् । प्रयाणीयम् । परियाणीयम् । अप्रयाणिः । अपरियाणिः । प्रयायिणौ । परियायिणौ । प्रहीणः । परिहीणः । प्रहीणवान । परिहीणवान् । अच इति किम् ? प्रभुग्नः । परिभुग्नः ।

मा कार्षीरन्तरयणं प्रयाणार्हमवेह्यमुम् ॥ भट्टि. ६।१०३
प्रहीणजीवितं कुर्युर्यें न शत्रुमुपस्थितम् ।
न्याय्याया अपि ते लक्ष्म्याः कुर्वन्त्याशु प्रहापणम् ॥ भट्टि. ६।१०४
निर्माणदक्षस्य समीहितेषु सीमेव पद्माऽसनकौशलस्य ।
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या स्थिताऽवहस्येव पुरं मघोनः ॥ भट्टि. १।६
तत् केकयी सोढुमशक्नुवाना ववार रामस्य वनप्रयाणम् ॥ भट्टि. ३।६
प्रयाणमात्रेण परे प्रसाध्ये वर्तेत यानेन कृताभिरक्षः । भट्टि. १२। ३४
आबद्धराममोहा वेलामूले विभावरी परिहीणा ॥ भट्टि. १३।१
प्रमाणं नोपकाराणमवगच्छामि यस्य ते ॥ भट्टि. १८।३०

मुक्तिः कैवल्यनिर्वाणश्रेयो निःश्रेयसामृतम् । अमर. १।५।६
अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरे । अमर. २।६। ११२
प्रादेशनं निर्वपणमपवर्जनमंहतिः । अमर. २। ७।३०
अपाङ्गदेशो निर्याणं । अमर. २। ८। ३८
कर्णीरथः प्रवहणं डयनं च समं त्रयम् । अमर. २।८।५२
यात्रा व्रज्याऽभिनिर्याणं प्रस्थानं गमनं गमः । अमर. २।८।६५
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् । अमर. २।६।८६
निर्वाणो मुनिवह्नयादौ । अमर. ३।१।६६
प्रमाणं हेतुमर्यादाशास्त्रेयत्ताप्रमातृषु । अमर. ३।३।५४

कालाः परिमाणिना । पा. २।२।५.
परिमाणे पचः । पा. ३। २।३३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजनेषु च । वा. ३।४।५१
निष्प्रवाणिश्च । पा. ५।१। १६०
निर्वाणोऽवाते । पा. ८।२।५०

प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोशगृहे नियुक्ताः ।
हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥
रघु. ५।२६

मणौ महानील इति प्रभावादल्पप्रमाणेऽपि यथा न मिथ्या ।
शब्दो महाराज इति प्रतीतस्तथैव तस्मिन्युयुजेऽर्भकेऽपि ॥
रघु. १८।४२.

तथापि नृपतेर्भक्त्याभीतो निर्वहणाकुलः ।
करोम्याख्यायिकाम्भोधौ जिह्वाप्लवनचापलम् ॥ हष. १।१६

णेर्विभाषा ॥३०॥

ण्यन्ताद् यो विहितः कृत्प्रत्ययः, तत्स्थस्योपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो विभाषा भवति । प्रयापणम्, प्रयापनम् । परियापणम्, परियापनम् । प्रयाप्यमाणम्, प्रयाप्यमानम् । प्रयापणीयम्, प्रयापनीयम् । अप्रयापणिः अप्रयापनिः । प्रयापिणौ, प्रयापिनौ ।

प्रहीणजीवितं कुर्युर्यें न शत्रुमुपस्थितम् ।
न्याय्याया अपि ते लक्ष्म्याः कुर्वन्त्याशु प्रहापणम् ॥ भट्टि. ६।१०४
परिमोहयमाणाभी राक्षसीभिः समावृताः ॥ भट्टि. ८।६३

प्रमापणं निर्वहणं निकारणं विशारणम् । अमर. २।८।११२
निर्वापणं विशसनं मारणं प्रतिघातनम् । अमर. २।८।११४

सद्रात् परिवापणे । पा. ५।४।६७
प्रवाहणस्य ढे । पा. ७।३।२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हलश्चेजुपधात् ।।३१।।

कृत्यच इति वतते । हलादिर्यो धातुरिजुपधस्तस्मात् परो यः कृत्प्रत्ययस्तत्स्थस्य उपसर्गस्थान्निमित्तादुत्तरस्य अच उत्तरस्य नकारस्य णकार आदेशो विभाषा भवति । प्रकोपणम्, प्रकोपनम् । परिकोपणम्, परिकोपनम् । हल इति किम् ? प्रेहणम् । प्रोहणम् । इजुपधादिति किम् ? प्रवपणम् । परिवपणम् । कृत्यच इति नित्ये प्राप्ते विकल्पः । अच इत्येव- परिभुग्नः ।

कः कृत्वा रावणाऽमर्षप्रकोपणमवद्यधीः ।
शक्तो जगति शक्राऽपि कर्तुमायुःप्रगोपणम् ।। भट्टि. ६।१०५

इजादेः सनुमः ।।३२।।

इजादेः सनुमो हलन्ताद्धातोर्विहितो यः कृत्प्रत्ययः, उपसर्गस्थान्निमित्तात् तत्स्थस्य उत्तरस्य नकारस्य णकार आदेशो भवति । प्रेङ्खणम् । परेङ्खणम् । प्रेङ्गणम् । परेङ्गणम् । प्रोम्भणम् । परोम्भणम् । सिद्धे सत्यारम्भो नियमार्थ इजादेरेव सनुमो नाऽन्यस्मादिति । प्रमङ्गनम् । परिमङ्गनम् ।

वनान्तप्रेङ्खणः पापः फलानां परिणिसकः ।
प्रणिक्षिष्यति नो भूयः प्रणिन्द्याऽस्मान् मधून्ययम् ।। भट्टि. ६।१०६

वा निंसनिक्षनिन्दाम् ।।३३।।

निंस निक्ष निन्दा इत्येतेषामुपसर्गस्थान्निमित्तादुत्तरस्य नकारस्य णकार आदेशो वा भवति । प्रणिंसनम्, प्रनिंसनम् । प्रणिक्षणम् प्रनिक्षणम् । प्रणिन्दनम्, प्रनिन्दनम् । उपसर्गात् ८।४।१४ इति नित्ये प्राप्ते विकल्पः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनान्तप्रेङ्खणः पापः फलानां परिणिसकः ।
प्रणिक्षिष्यति नो भूयः प्रणिन्द्याऽस्मान् मधून्ययम् ॥ भट्टि. ६।१०६

न भाभूपूकमिगमिप्यायीवेपाम् ॥३४॥

भा भू पू कमि गमि प्यायी वेप इत्येतेषामुपसर्गस्थान्निमित्तादुत्तरस्य कृत्स्थस्य नकारस्य णकार आदेशो न भवति । भा-प्रभानम् । परिभानम् । भू-प्रभवनम् । परिभवनम् । पू (पूङ्)-प्रवपनम् । परिवपनम् । कमि-प्रक्रमनम् । परिक्रमनम् । गमि-प्रगमनम् । परिगमनम् । प्यायी-प्रप्यानम् । परिप्यानम् । वेप-प्रवेपनम् । परिवेपनम् ।

हरेः प्रगमनं नास्ति, न प्रभानं हिमद्रुहः ।
नातिप्रवेपनं वायोर्मया गोपायिते वने ॥ भट्टि. ६। १०७

षात्पदान्तात् ॥३५॥

पदान्तात् षकारादुत्तरस्य नकारस्य णकार आदेशो न भवति । निष्पानम् । दुष्पानम् । सुनिष्पानम् । यजुष्पानम् । पदान्तादिति किम् ? कुष्णाति । पुष्णाति ।

दुष्पानः पुनरेतेन कपिना भङ्गसंभृतः ।
प्रनष्टाविनयेनाऽन्यः स्वादुः पुष्पाऽसवो वने ॥ भट्टि. ६।१०८

नशेः षान्तस्य ॥३६॥

षकारान्तस्य नशेः नकारस्य णकार आदेशो न भवति । प्रनष्टः । षान्तस्येति किम् ? प्रणश्यति । परिणश्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दुष्पानः पुनरेतेन कपिना भृङ्गसंभृतः ।
प्रनष्टविनयेनाऽग्र्यः स्वादुः पुष्पाऽसवो वने ॥ भट्टि. ६।१०८
विद्युत्प्रणाशं स वरं प्रनष्टा यद्वाऽर्ध्वशोषं तृणवच्च शुष्कः । भट्टि. ३।२४
प्रनष्टमूर्तिप्रविभागमुद्यन् प्रत्युज्जहारेव ततो विवस्वान् ॥ भट्टि. ११।२०
उपेक्षणीयैव परस्य वृद्धिः प्रनष्टनीतेरजितेन्द्रियस्य । भट्टि. १२।२७
राक्षसस्य न चात्राऽसोत् प्रनष्टुमयतिष्ट च । भट्टि. १५।५८

पदान्तस्य ॥३७॥

पदान्तस्य नकारस्य णकार आदेशो न भवति । वृक्षान् । प्लक्षान् । अरीन् । गिरीन् ।

दूतांश्च राजाऽत्मजमानिनीषून् प्रास्थापयन् मन्त्रिमतेन यूनः ॥
भट्टि. ३।२३
एष शोकच्छिदो वीरान् प्रभो ! सम्प्रति वानरान् ।
धराशैलसमुद्राणामन्तगान् प्रहिणोम्यहम् ॥ भट्टि. ७।२७
चतुष्काष्ठं क्षिपन् वृक्षान् तिरस्कुर्वन्नरीन् रणे ।
तिरस्कृतदिगाभोगो ददृशे बहुधा भ्रमन् ॥ भट्टि. ६।६२

अनयत् प्रभुशक्तिसम्पदा वशमेको नृपतीननन्तरान् ।
अपरः प्रणिधानयोग्यया मरुतः पञ्च शरीरगोचरान् ॥ रघु. ८।१६
आवृणोदात्मनो रन्ध्रं रन्ध्रेषु प्रहरन् रिपून् । रघु. १७।६१

पदव्यवायेऽपि ॥३८॥

निमित्तनिमित्तिनोः पदव्यवाये सत्यपि नकारस्य णकार आदेशो न भवति । माषकुम्भवापेन । चतुरङ्गयोगेन । प्रावनद्धम् । पर्यवनद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोषभीममुखेनैवं क्षुभ्नतोक्ते प्लवङ्गमः ।
प्रोचे सानुनयं वाक्यं रावणं स्वार्थसिद्धये ॥ भट्टि. ६।१०६

क्षुभ्नादिषु च ।।३९।।

क्षुभ्ना इत्येवमादिषु शब्देषु नकारस्य णकार आदेशो न भवति ॥ क्षुभ्नाति । क्षुभ्नादिराकृतिगणः ॥

रोषभीममुखेनैवं क्षभ्नतोक्ते प्लवङ्गमः ।
प्रोचे सानुनयं वाक्यं रावणं स्वार्थसिद्धय ॥ भट्टि. ६।१०६
तान् प्रत्यवादीदथ राघवोऽपि यथेप्सितं प्रस्तुत कर्म धर्म्यम् ।
तपोमरुद्भिर्भवतां शराऽग्निः सन्धुक्ष्यतां नोऽरिसमिन्धनेषु ॥
भट्टि. २।१२
नाक्षुभ्नाद् राक्षसो भ्रातुः शक्तिं चोदवृहद् गुरुम् ॥ भट्टि. १७।६०
समक्षुभ्नन्नुदन्वन्तः प्राकम्पत महीभृतः । भट्टि. १७।१०८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोलाद्रिस्थस्यांऽशुवर्माभिलेखस्य तिथ्यादिकानां पञ्चसिद्धान्तिकानुसारिणी गणना

– दिनेशराजः पन्तः

नेपाले लिच्छविकालस्याऽसन्नद्विशता अभिलेखा अद्य यावल्लब्धाः। तेष्वभिलेखेष्वंशुवर्मणो दोलाद्रिस्थाभिलेखं सहोत्तरायाः सौश्रुत्याः संहितायाः पुष्पिकावाक्यं च विना कुत्राऽपि वारस्योल्लेखो न लभ्यते। अतोंऽशुवर्मणः सोऽभिलेखो नेपालस्य लिच्छविकालस्य पञ्चाङ्गगणनापद्धतौ महतीमुपयोगितां वहति। अंशुवर्मणस्तस्मिन्नभिलेखे संवत्सरस्य मासस्य पक्षस्य तिथेर्वारस्य नक्षत्रस्य च युगपदुल्लेखो वर्तते। अतो गणितज्ञास्तेषां परीक्षां कृत्वा तत्रत्यं संवत्सरं निर्णेतुं शक्नुवन्ति।

अंशुवर्मणः संपूर्णः सोऽभिलेखोऽत्र प्रस्तूयते।

ॐ

एकत्रिंशत्तमे वर्षे वर्तमाने स्वसंस्थया
माघशुक्लत्रयोदश्याम्पुष्येण सवितुर्दिने १
कालेन शीर्णमवलोक्य समस्तमाद्यं
हैमं हरेर्भगवतः कवचं सतार्क्ष्यम्
तस्मान्निदर्शनमवाप्य जगद्धितार्थं
सञ्चस्करुवान्नरपतिः पुनरंशुवर्मा २

[अयमभिलेख इदम्प्रथमतया वज्राचार्योपनामकेन धनवज्रेण प्रकाशितः। २०३४ वैक्रमाब्दे संशोधनमण्डलेन प्रकाशितायाः पूर्णिमापत्रिकायाः ३६ अङ्कस्य २७३–२७५ पृष्ठेषु प्रकाशितः पन्तोपनामकस्य दिनेशराजस्य चाँगुको अंशुवर्माको अभिलेखको तिथिमितिको गणना (दोलाद्रिस्थस्यांऽशुवर्माभिलेखस्य तिथ्यादिकानां गणना) नाम निबन्धो द्रष्टव्यः। तत्रैवाऽस्याऽभिलेखस्य प्रकाशकाः प्रकाशनसमयाश्च निर्दिष्टाः।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र ३१ संवत्सरे माघशुक्लत्रयोदश्यामादित्यवासरः पुष्यनक्षत्रं च बभूवेत्युल्लेखो वर्तते ।

भक्तपुर इनायचोकुल्या अभिलेखे ३१ संवत्सरे पौषमासेऽधिमासो बभूवेत्युल्लेखो वर्तते । यथा–

संवत् ३१ द्वितीयपौषशुक्लाष्टम्याम्

(अयमभिलेख इदम्प्रथमतया खनालोपनामकेन मोहनप्रसादेन प्रकाशितः । पूर्णिमायाः ३६ अङ्कस्य २७४ पृष्ठं द्रष्टव्यम् । तत्रैवाऽस्याऽभिलेखस्य प्रकाशकाः प्रकाशनसमयाश्च निर्दिष्टाः ।)

नेपालद्रोण्यां रचिते सुमतितन्त्रनामके सिद्धान्तज्यौतिषग्रन्थे ४६८ शकवत्सरानन्तरं (६३३ वैक्रमाब्दानन्तरं) मानदेवसंवत्सरः प्रादुर्बभूवेति लिखितं वर्तते । यथा–

मूलपाठः

जातो दुर्योधनो राजा कलि – – प्रवर्त्तते ।
युधिष्ठिरो महाराजो दुर्योधनस्तयोःपि वा ।
उभौ राजौ सहस्रे द्वे वर्षन्तु सम्प्रवर्त्तति ।
नन्दराज्यं शताष्टञ्च श्चन्द्रगुप्तस्ततोपरे
राज्यङ्करोति तेनापि द्वात्रिंशच्चाधिकं शतम् ।
राजा शूद्रकदेवश्च वर्ष सप्ताब्धि चाश्विनौ
शकराजा ततो पश्चाद्वसुरन्ध्रकृतन्तथा ।
इत्येते – षितम्मह्यं ज्ञेया राजा क्रमेण तु ।
. . . कृतअम्बराग्नि – – –
ोमानदेवाब्द प्रयुज्यमाना एतानि पिण्ड . . .

(वीरपुस्तकालयस्थस्य चतुर्थविभागस्थस्य ५७ सङ्ख्याकस्य ताडपत्रे लिखितस्य सुमतितन्त्रस्य २ ख पत्रे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युधिष्ठिरदुर्ज्जोधन उभो राज्याब्द २००० नन्द-राज्याब्द ८०० चन्द्रगुप्तराज्याब्द १३२ सुद्रकदेवराज्याब्द २४७ शकराज्याब्द ४९८ मानन्देवस्य राज्याब्द ३०४

(तस्यैव सुमतितन्त्रस्य पत्रे । अत्र पत्रसङ्ख्या न दृश्यते ।)

संशोधितः पाठः

युधिष्ठिरसंवत्

दुर्योधने महीपाले कलिः प्रादुर्भविष्यति ।
युधिष्ठिरो महाराजो नृपो दुर्योधनस्तयोः ।।
समासहस्रद्वितयं [२०००] यावत् कालो भविष्यति ।

नन्दसंवत्

नन्दकालः शतान्यष्टौ [८००]

चन्द्रगुप्तसंवत्

ततः कालो भविष्यति ।।
द्वात्रिंशं च शतं [१३२] यावच् चन्द्रगुप्तस्य भूपतेः ।

शूद्रकदेवसंवत्

कालः शूद्रकदेवस्य सप्तवेदभुजै [२४७] र्मितः ।।

शकसंवत्

ततः शकमहीभर्तुर्वसुरन्ध्रकृतै [९८] र्मिताः ।
समा वर्तिष्यते कालो राजकाला इमे स्मृताः ।।

मानदेवसंवत्

श्रीमानदेवाब्द इति प्रसिद्धः
संवत्सरः सागरशून्यरामैः [३०४] ।
तुल्यानि वर्षाणि चरिष्यतीह
कल्यादितो यातसमाः प्रसाध्याः ।।

युधिष्ठिरदुर्योधनयोरुभयो राज्याब्दाः २००० । नन्द-राज्याब्दाः ८००। चन्द्रगुप्तराज्याब्दाः १३२ । शूद्रकदेवराज्याब्दाः २४७। शकराज्याब्दाः ४९८। मानदेवराज्याब्दाः ३०४ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[२०३४ वैक्रमाब्दे त्रिभुवनविश्वविद्यालयान्तर्गतसंस्कृताध्ययन-संस्थानान्तर्गतेन वाल्मीकिविद्यापीठेन प्रकाशिताया मर्यादापत्रिकायाः १३ अङ्के प्रकाशितः पितुः पन्तोपनामकस्य नयराजस्य भण्डार्युपनामकस्य देवीप्रसादस्य पन्तोपनामकस्य दिनेशराजस्य च सुमतितन्त्रवाट नेपालको इतिहासमा पर्न सक्ने प्रकाश (सुमतितन्त्राद् नेपालस्येतिहासे जायमानः प्रकाशः) नाम निबन्धो द्रष्टव्यः (८-१० पृष्ठेषु)।]

सुमतितन्त्रस्य काष्ठमण्डपस्थस्य पुस्तकस्योद्धरणमुपरि कृतम्। सुमतितन्त्रस्य ताडपत्रे लिखितमन्यत् पुस्तकं त्रिटिशसङ्ग्रहालये वर्तते। तत्र मानदेवसंवत्सरस्योल्लेख इत्थं लभ्यते-

सेषा युताभ्र कृतअम्बराग्नि ३०४
श्रीमानदेवाब्द प्रयुज्यमाना
एतानि पिण्ड कलिवर्षमाहुः॥

[पूर्णिमायाः २६ अङ्के प्रकाशितः पन्तोपनामकस्य दिनेशराजस्य मानदेवसंवद् नाम निबन्धो द्रष्टव्यः (२७२ पृष्ठे)।]

वीरपुस्तकालयस्थिते हरिवंशे मानदेवसंवत्सरस्य चर्चा दृश्यते। यथा-

अथ॥ श्रीकलिराजवर्ष ४७५६॥...अथ॥श्रीविक्रमाब्द॥ १७१२॥अथ श्रीशकरराजवर्ष॥ १५७७॥...अथ श्रीमानदेव-राजवर्ष॥१०७९॥

[२०३५ वैक्रमाब्दे प्रकाशितायाः पूर्णिमापत्रिकायाः ३६ अङ्के प्रकाशितः पितुः पन्तोपनामकस्य नयराजस्य पन्तोपनामकस्य महेशराजस्य च वि. सं. ६३३ देखि नेपालमा नयाँ संवत् चलेको थियो भन्ने कुराका प्रमाण नेपालमा र भोटमा गरी जम्मा ४ वटा पाइएका छन् (६३३ वैक्रमाब्दाद् नेपाले नवीनः संवत्सरः प्रादुर्बभूवेति नेपाले भोटे च चत्वारि प्रमाणानि लब्धानि) नाम निबन्धो द्रष्टव्यः (६८ पृष्ठे)।]

अत्र विक्रमवत्सरस्य सङ्ख्या १७१२, मानदेववत्सरस्य सङ्ख्या १०७९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिखिता वर्तते। अतः १७१२–१०७६ = ६३३ वैक्रमाब्दानन्तरं मानदेव-संवत्सरः प्रादुर्बभूवेत्यस्मात् पुस्तकादपि स्फुटीभवति।

वराहमिहिरेण रचितं पञ्चसिद्धान्तिकानाम करणं बहुकालपर्यन्तं लुप्त-प्रायमिव बभूव। पुरातत्त्वान्वेषकस्य बुह्लरमहोदयस्य प्रयत्नेन कश्मीरप्रदेशे पञ्चसिद्धान्तिकायाः पुस्तकद्वयमलभ्यत। पुस्तकद्वयमपि भ्रष्टरूपमासीत्। पञ्चसिद्धान्तिकायाष्टीका च नोपलब्धा। काशिकराजकीयमहाविद्यालया-ध्यक्षेण थिबोमहाशयेन महामहोपाध्यायेन सुधाकरद्विवेदिना च संमील्य पञ्चसिद्धान्तिकायाः सम्पादनं कृतम्। पञ्चसिद्धान्तिकाया विषये शङ्करबालकृष्णमहोदयेनाऽपि बहु लिखितं वर्तते। तथैव नाइगेबाउर-महोदयेन डेभिडपिङ्ग्रीमहोदयेन च संमील्य पञ्चसिद्धान्तिकायाः सम्पादनं कृतम्।

पञ्चसिद्धान्तिकान्तर्गतस्य सूर्यसिद्धान्तस्य विस्तृतरूपमेव सुमतितन्त्रमिति स्फुटम् (२०३५ वैक्रमाब्दे त्रिभुवनविश्वविद्यालयान्त-र्गतेन पाठ्यक्रमविकासकेन्द्रेण पितुः पन्तोपनामकस्य नयराजस्य मख्डा-र्युपनामकस्य देवीप्रसादस्य पन्तोपनामकस्य दिनेशराजस्य च सम्पादकत्वे प्रकाशितस्य सुमतितन्त्रस्य प्रस्तावना द्रष्टव्या।)

अथ पञ्चसिद्धान्तिकायां निर्दिष्टेन प्रकारेण तस्यांऽशुवर्माभिलेख-स्य गणना क्रियते।

पूर्वमहर्गणविषये वराहमिहिरस्य पद्यान्यधः प्रस्तूयन्ते–

मूलपाठः

सप्ताब्धिवेदसंख्यं शककालमपास्य चैत्रशुक्लादौ।
अर्द्धास्तमिते भानौ यवनपुरे सौम्यदिवसाद्ये ॥८॥
मासीकृते समासे द्विष्टे सप्ताहतेष्टयमपक्षैः।
लब्धैर्युतोधिमासैस्त्रिशघ्नस्तिथियुतो द्विष्टः ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रुद्रघ्नः समनुशरो लब्धोनो गुणखसप्तभिर्द्युगणः ।
पाठान्तरम् – भौम्यदिवसाद्यः, भौमदिवसाद्ये
(पञ्चसिद्धान्तिकायाः १ अध्याय)

संशोधितः पाठः

सप्ताश्विवेद[४२७]सङ्ख्यं शककालमपास्य चैत्रशुक्लादौ ।
अर्द्धास्तमिते भानौ यवनपुरे भौमदिवसाद्ये ।।८।।
मासीकृते समासे द्विष्ठे सप्ता[७]हतेऽष्टयमपक्षैः[२२८] ।
लब्धैर्युतोऽधिमासैस्त्रिंशद्[३०] घ्नस्तिथियुतो द्विष्ठः ।।९।।
रुद्र[११]घ्नः समनुशरो[५१४] लब्धोनो गुणखसप्तभि[७०३]र्द्युगणः ।

अस्य सूत्रस्याऽङ्कव्याख्या ।

शकवत्सरसङ्ख्यायाः सप्तविंशत्यधिकचतुश्शत (४२७)-सङ्ख्या वियोज्या शेषमितो वर्षगणो भवति । वर्षगणो द्वादशभि- (१२) र्गुणनीयो गुणनफले गतमासा योजनीयाः सौरमासगणो भवति । सौरमासगणः सप्तभि (७) र्गुण्यो गुणनफलमष्टा-विंशत्यधिकशतद्वयेन (२२८) भाज्यमधिमासा लभ्यन्ते । अधि-मासाः सौरमासगणे योजनीयाश्चान्द्रमासगणो भवति । चान्द्रमास-गणस्त्रिंशता (३०) गुणनीयो गुणनफले वर्तमानस्य मासस्य शुक्लादिका गततिथयो योजनीयास्तिथिगणो भवति । तिथिगण एकादशभि (११) र्गुण्यो गुणनफले चतुर्दशाधिकपञ्चशतो (५१४) योजनीया योगस्त्र्यधिकसप्तशत्या (७०३) भाज्यो लब्धिमिता अवमदिवसा भवन्ति । अवमदिवसास्तिथिगणाद् विशोधनीयाः शेषमितोऽहर्गणो भवति । अहर्गणं सप्तभि (७)-स्तक्ष्णुयाच् शून्य (०) शेषे भौमवासर एक (१) शेषे बुधवासर इति क्रमेण वारो भवति ।

अनयैव रीत्यांऽशुवर्माभिलेखस्य गणना क्रियते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३१ मानदेवसंवत्सरस्य ५२९ शकवत्सरस्य ६६४ वैक्रमाब्दस्य माघशुक्लत्रयोदश्यां रविवासरस्याऽहर्गणः साध्यते ।

पौषेऽधिमासः । अतश् चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रः, आश्विनः, कार्तिकः, मार्गः, प्रथमपौषः, द्वितीयपौषः इत्येत एकादश मासा व्यतीताः ।

माघशुक्लप्रतिपदस्त्रयोदशीपर्यन्तं गततिथयो द्वादश ।

मानदेवसंवत्सरः = ३१
+ ४९८
शकसंवत्सरः = ५२९
- ४२७
वर्षगणः = १०२
× १२
१२२४
गतमासाः = + ११
सौरमासगणः = १२३५
अधिकमासाः = + ३७
चान्द्रमासगणः = १२७२
× ३०
३८१६०
गततिथयः = + १२
तिथिगणः = ३८१७२
अवमदिवसाः = - ५९८
अहर्गणः = ३७५७४

१२३५ सौरमासगणः
× ७
२२८) ८६४५ (३७ अधिकमासाः
६८४
१८०५
१५९६
२०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३८१७२ तिथिगणः
× ११
४१९८९२
+ ५१४
७०३) ४२०४०६ (५९८ अवमदिवसाः
३५१५
६८९०
६३२७
५६३६
५६२४
१२

अहर्गणपरीक्षा

७) ३७५७४ (५३६७
३५
२५
२१
४७
४२
५४
४९
५ शेषः

० । १ । २ । ३ । ४ । ५
म.। बु. । बृ. । शु. । श. । आ. अत आदित्यवासरः ।

अतः पञ्चसिद्धान्तिकानुसारमप्यंशुवर्माभिलेखस्य वारः सङ्गच्छत इति स्फुटम् ।

शेषमग्रिमेऽङ्के ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जि. का भ. द नं. ४।०३५/३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu